**उपानह्** स्त्री उप+नह–क्विप् उपसर्गदीर्घः। चर्म्मपादुकायाम्। "कृतावरोहस्य हयादुपानहौ नियोक्तुकामे किमु वद्धवर्म्मणी" इति नैध० अत्रोपानहोः वर्म्मत्वेनोत्प्रेक्षणात् तस्याः सर्व्वाङ्गावरकत्वं गम्यते तेन लोके (मोजा) इत्यादिप्रसिद्धाया एव तथात्वम् एकदेशमात्रावरकत्वे तु पादुकाशब्दप्रयोगः। "अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम्" "श्वेतं हिरण्यं गामश्वं छत्रोपनहमासनम्" मनुः छत्रोपानहमित्यत्र समा० द्व० अच् समा०। एवमन्यशब्देन द्वन्द्वेऽपि। दण्डोपानहमित्यादि "उपानहौ च वासश्च धृतमन्यैर्न धारयेत्" "स्वयं नोपानहौ हरेत्" "सोपात्कस्य यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते" मनुः।[सदृशे वैदिके वाक्यभेदे

**उपानुवाक्य** न० उपगतमनुवाक्याम् अत्या० स०। अनुवाक्या-

**उपान्त** पु० उपमितमन्तेन अवा० स०। १निकटे, २प्रान्ते च। "दिशामुपान्तेषु ससर्ज दृष्टिम्" "नयनोपान्तविलोकितञ्च यत्" "उपान्तभागेषु च रोचनाङ्कः" कुमा०। "मेरोरुपान्तेष्वपि वर्त्तमानः" "उपान्तवानीरगृहाणि दृष्ट्वा" रघुः। "शय्योपान्तनिविष्टसस्मितसखी" सा० द० "तिरोहितोपान्तनभोदिगन्तरा" किरा०। अन्तश्च सीमाभेदः स च दैशिकः कालिकः बुद्धिकल्पितश्च। "उपान्त्यतो निवर्त्तेत" वृ० र०। अन्तस्य समीपम् अव्ययी०। २अन्तसमीपे अव्य०।

**उपान्तिक** न० उप आधिक्ये प्रा० स०। १अत्यन्तान्तिके अतिनिकटे "यदुपान्तिकेषु ददतोमहीरुहः" माघः "प्रसभानुपान्तिकनीपरेणुकीर्णम्" किरा०। २तद्वृत्तौ त्रि० अस्मादर्थत्वात् ततः प्रातिपदिकार्थे पञ्चमी "यच्च वीरं न पश्यामि धनञ्जयमुपान्तिकात्" भा० व० अ०

**उपान्तिम** त्रि० उपगतमन्तिमम् अत्या० स० उपान्तशब्दात्तु न डिमच् प्रत्ययविधौ तदन्तविध्यभावात्। १अन्तिमोपगते "गुणयान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैवमुपान्तिमादीन्" लीला०। सामीप्ये अव्ययी०। २अन्तिमसमीपे अव्य०

**उपान्त्य** त्रि० उपान्ते भवः दिगा० यत्। अन्तसमीपवर्त्तिनि "अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनस्य त्रिभो मतः" म० त० "उत्तमपदमुपान्त्यस्योपलक्षणार्थम्" सि० कौ०।

**उपाप्ति** स्त्री उप+आप–क्तिन्। प्राप्तौ, "यदेतानि सर्व्वाणि सह दुरुपापानि कैतेषामुपाप्तिरिति" शत० ब्रा० १०, १, २, ६

**उपाभृत्** स्त्री उप+आ–भृ–क्विप् तुक्। उपाहरणे, "स न जर्ज्जीमुपाभृत्यया कृपा न जूर्ज्जति" ऋ० १, १०८, २। "उपाभृति उपाहरणे" भा०।

**उपाय** पु० उप+अय–भावे घञ्। १उपगमे। उपायतेऽर्थोऽनेन करणे घञ्। २साधने, स च द्विविधः लौकिकोऽलौकिकश्च तत्र घटादिकं प्रति दण्डादिर्लौकिक उपायः स्वर्गं प्रति यागादिरलौकिक उपायः। "उपायेन च यच्छक्यं तच्छक्यं न पराक्रमे" हितो०। "पुंसोनेष्टाभ्युपायत्वात्" कुसु०। ३राज्ञां रिपुनिराकरणहेतुषु सामादिषु च। "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"। "उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः" माघः। "सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः" मनुः। राज्ञां विजयोपायाश्च सामादयश्चत्वारः "साम भेदश्च दण्डश्च दानञ्चैव चतुष्टयम्। उपायाः कथिताराज्ञां स्वार्थसम्पत्तये ध्रुवम्" इत्युक्तेः एतेषां लक्षणानि तत्तच्छब्दे वक्ष्यन्ते। क्वचित् सप्तोपायाः पठ्यन्ते। "साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम्। मायोपेक्षेन्द्रजालञ्च सप्तोपायाः प्रकीर्त्तिताः" शृङ्गारोपायौ च द्वौ "शृङ्गारे तु पुराविद्भिरुपायौ द्वौ प्रकीर्त्तितौ। उपायौ द्वौ प्रयोक्तव्यौ कान्तासु सुविचक्षणैः। सामदाने इति प्राहुः शृङ्गाररसकोविदाः। भेदे प्रयुज्यमाने हि रसाभासस्तु जायते। निग्रहे रसभङ्गः स्यात्तस्मात्तौ दूषितौ बुधैः" इत्यालङ्कारिकोक्तेः। ४प्रयुक्तधनप्राप्तिसाधने उत्तमर्णव्यापारभेदे च "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः। तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्" मनुः। ते चोपायाः मनुना दर्शिता यथा "धर्म्मेण व्यवहारेण, छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च"। तत्र धर्म्म उक्तो वृहस्पतिना "सुहृत्सम्बन्धिसन्दिष्टैः साम्ना चानुगमेन च। प्रायेण वा ऋणी दाप्योधर्म एष उदाहृतः" छलादीनि त्रीण्युक्तानि तेनैव "छद्मना याचितञ्चार्थमानीय ऋणिकाद्धनी। अन्याहृतानि वाऽऽहृत्य दाप्यते यत्र सोपधिः। दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम्। यत्रार्थी दाप्यतेऽस्वार्थं तदाचरितमुच्यते। बद्ध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः। ऋणिकोदाप्यते यत्र बलात्कारः स कीर्त्तितः" व्यवहारस्तु मनुना स्वयं दर्शितः। "अर्थेऽपवदमानं तु कारणेन विभावितम्। दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः"। तेन राजावेदनरूपोव्यवहारः" कुल्लू० (नालिश)। मेधातिथिस्तु निःस्वो व्यवहारेण दापयितव्यः अन्यत् कर्म्मोपकरणं धनं दत्त्वा, कृषिवाणिज्यादि तेन कारयित्वा तत्रोत्पन्नं धनं तस्माद्गृह्णीयादित्याह"। ५उपक्रमे च।